दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-267 | 1 | जुलाई 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लचतुर्थी
श्रावण 03 प्रविष्टांशः मङ्गलमयः भवेत्

2 द्वितीयायां एकदिवसीयक्रिकेटस्पर्धायां इंग्लैण्डदेशेन भारतं पराजितम्, श्रृंखला १-१ इति समतायाम्

3 नीट-यूजी (NEET-UG) २०२६ परीक्षायाः परिणामः घोषितः, ११.२१ लक्षं (11.21 लाख) अभ्यर्थिनः उत्तीर्णाः

4 पुनः-नीट-परीक्षायां डीपीएस-बोकारो-विद्यालयस्य उत्कृष्टं प्रदर्शनम् अखिलभारतीय-क्रमाङ्के ५४६ प्राप्वा आदित्यः विद्यालयस्य श्रेष्ठः अभवत्

# प्रधानमन्त्रिणा मोदीमहोदयेन भारतस्य प्रथम-हाईड्रोजन्-रेलयानस्य उद्घाटनं कृतम्



**हिमसंस्कृतवार्ता।** प्रधानमान्त्रिणा नरेन्द्रमोदिना हरियाणा-राज्यस्य जिन्द-सोनीपत-नगरयोः मध्ये भारतस्य प्रथमं हाईड्रोजन-शक्तियुक्तं रेलयानं जिन्द-रेल-स्थानके हरितध्वजं प्रदर्श्य उद्घाटितम्, यत् स्वच्छं तथा सुस्थिरं रेल-परिवहनं प्रति प्रमुखं पदाक्षेपं निर्दिशति । प्रधानमन्त्रिणा राष्ट्रिय राजमार्ग-परियोजनया सह चतुर्दश सहस्र-कोटिरूप्यकाणां विभिन्नानां विकास परियोजनानां शिलान्यासं, लोकार्पणम् च कृतम् । सः सप्त-पञ्चाशदधिकैक-शतं किलोमीटर परिमितं सुदीर्घ दिल्ली-अमृतसर-कटरा-द्रुतमार्गमपि राष्ट्राय समर्पितवान्, येन दिल्ली-कटरा-नगरयोः मध्ये प्रायः षट्होरा यावत्, देहली-अमृतसर-नगरयोः मध्ये च यात्राकालः प्रायः चतुर्होरा यावत् न्यूनीभवति। जनसमूहं सम्बोधयन्, प्रधानमन्त्री श्रीमोदी अवदत् यत् भारतीय-रेल-विभागे विगत-द्वादशवर्षेषु महतीं परिवर्तनं जातम्, तथा च हाईड्रोजन्-रेल इतीदं ऐतिहासिकं सोपानम् इति वर्णयन् भारतस्य इतिहासे जिन्द-प्रदेशाय विशिष्टं स्थानं प्रदत्तम्।

### स्वदेशीय-हाईड्रोजन-तन्त्रज्ञानस्य विकासस्य भारतस्य संकल्पं प्रतिबिम्बयति- अश्विनीवैष्णवः

अस्मिन् अवसरे रेलमन्त्री अश्विनीवैष्णवः, देशस्य प्रथमस्य हाईड्रोजन-शक्तियुक्तस्य रेलयानस्य प्रचालनम् ऐतिहासिकं साफल्यम् च उक्तवान्, यत् एतत् स्वदेशीय-हाईड्रोजन-तन्त्रज्ञानस्य विकासस्य भारतस्य संकल्पं प्रतिबिम्बयति । पश्चात् प्रधानमन्त्रिणा चण्डीगढनगरे स्वास्थ्यक्षेत्राणि समेत्य प्रमुखेषु क्षेत्रेषु अनेकाः विकासपरियोजनाः समारब्धाः। जनसमूहं सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत् चण्डीगढस्य विकासेन जनानां जीवनं परिवर्तितम् अस्ति, परन्तु अस्य लाभः नगरात् परं विस्तारितः अस्ति, हरियाणा, पञ्जाब, हिमाचलप्रदेशस्य जनान् अपि भवति । सः अवदत् यत् अद्य पी. जी. चण्डीगढे उन्नत स्वास्थ्य-सुविधाः सन्ति । चण्डीगढस्य स्वास्थ्य सेवायाः विस्तारः प्रचलति, येन लक्षशः जनाः उपकृताः भविष्यन्ति । प्रधानमन्त्री पञ्जाबस्य जलन्धर-नगरमपि गतवान् यत्र सः प्रायः सार्ध-पञ्च-सहस्र-कोटिरूप्यकाणां रेल-मार्ग-अवसंरचना-परियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्।

## होर्मुज-जलसंधौ वर्धितासुरक्षाकारणात् भारतीयानां नाविकानां नियुक्तिं निवारयितुं निर्देशः

समुद्रीय-प्रशासन-महानिदेशालयेन (डी. जी. एम्. ए.) इत्यनेन नौका-स्वामिनः, नौका-प्रबन्धकाः, रिक्रूटमेण्ट्-एण्ड्-प्लेसमेण्ट्-सर्विस्-लाईसेन्स्-कम्पनीज् इत्येतेभ्यः निर्देशः प्रदत्तः यत् आगामि-आदेशपर्यन्तं होर्मुज-जलसंध्याः माध्यमेन यात्रां कुर्वतां नौकासु भारतीयानां नाविकानां नियुक्तिं निवारयन्तु । समुद्रतटीयप्रशासनेन गल्फ-प्रदेशे वर्धितासुरक्षायाः स्थित्यानुसारं भारतीयानां नाविकानां सुरक्षायाः संरक्षायाः च निवारकोपायानां विषये परामर्शः प्रदत्तः। डी. जी. एम्. ए. इत्यनेन उक्तं यत्, गत-कतिपयेषु दिनेषु व्यापारि-नौकायानानां उपरि आक्रमणेन सम्बद्धाः सद्यः एव घटिताः घटनाः, संघर्षप्रभावितक्षेत्रे कार्यं कुर्वतां नाविकानां वाणिज्य-नौकायानानां च सम्मुखीकरणस्य सङ्कटानि महत्त्वपूर्णरूपेण वर्धितानि सन्ति ।

## राष्ट्रपतिः द्रौपदीमुर्मुः मोल्डोवा-उत्तरमेसिडोनिया-रोमानियादेशानां ऐतिहासिक-राजकीयभ्रमणं करिष्यति



राष्ट्रपतिः द्रौपदीमुर्मुः अस्य मासस्य नववदशतः पञ्चविंशतिः दिनाङ्कपर्यन्तं मोल्डोवा, उत्तर-मेसिडोनिया, रोमानिया-देशानां राजकीयभ्रमणं करिष्यति। नवदेहली-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, विदेशमन्त्रालयस्य सचिवः (पश्चिम) सिबी जार्जः अवदत् यत् एतानि राज्यपर्यटनानि मोल्डोवा-गणराज्यस्य, उत्तर-मेसिडोनिया-गणराज्यस्य, रोमानिया-गणराज्यस्य च राष्ट्रपतिनां आमन्त्रणेन क्रियन्ते इति। सः अवदत् यत् अस्य यात्रायाः ऐतिहासिकं महत्त्वं वर्तते यतः एतत् मोल्दावा-गणराज्यस्य, उत्तर-मेसिडोनिया-देशस्य च भारतीयराष्ट्रपतेः प्रथम-वैपाक्षिक-यात्रा भविष्यति। सः अवदत् यत्, रोमानिया-देशस्य यात्रा, त्रिषु दशकेषु भारतीयराष्ट्रपतेः प्रथमा राजकीय-यात्रा भविष्यति ।

# पाकिस्ताने अल्पसङ्ख्यकानां स्थितिं न्यायपालिकायाः दुर्बलतां च प्रति यूरोपीयसङ्घस्य गम्भीरचिन्ता



यूरोपीयसङ्घः पाकिस्तानस्य मानव अधिकार-स्थितिं प्रति गम्भीरं चिन्तां प्रकटितवान् अस्ति। सामान्यीकृत-प्राधान्यता-योजना अथवा जी. एस्. पी. प्लस इत्यस्य अन्तर्गतस्य व्यापार-लाभानां कृते पाकिस्तानस्य निरन्तर-प्रवेशः, 2027 तमवर्षात् संशोधितस्य जी. एस्. पी. संरचनायाः अन्तर्गतस्य अन्ताराष्ट्रिय-प्रतिबद्धतानां अनुपालनं प्रति अवलम्बितः भविष्यति इति सः सावधानम् अददात् । अद्यतनीनां संविधान संशोधनानां विषये अपि प्रतिवेदने चिन्ता प्रकटिता। सः अवदत् यत् एतेषां परिवर्तनानां कारणेन न्यायपालिकायाः स्वातन्त्र्यम् इतोऽपि दुर्बलं जातम् इति तेन निन्दयता उक्तम्। अल्पसङ्ख्यकानां समुदायानां स्थितिं प्रकाश्य, प्रतिवेदनम् अवदत् यत् ते निरन्तरं भेदभावं, व्यक्तिगतम् आक्रमणं, जनसमूहहिंसां, पूजास्थलानां क्षतिं च सम्मुखीकुर्वन्तः सन्तीति । प्रतिवेदनानुसारं, अनेन अपराधीनां दण्डमुक्तिः, पीडितानां मध्ये भयः च अभवत्। सः इतोऽपि अवदत् यत् पाकिस्तान्-देशस्य विधि-संरचना धार्मिक-जातीय-भाषिक अल्पसङ्ख्यकानां पर्याप्ततया मान्यतां संरक्षणं वा न करोति इति ।

## सुभाषितम्

**दुर्जनेन समं सख्यं, प्रीतिं चापि न कारयेत्।**
**उष्णो दहति चांगारः, शीतः कृष्णायते करम्॥**

अर्थात्- दुर्जन से न ही मित्रता और न ही शत्रुता करनी चाहिए क्योंकि कोयला अगर गर्म हो तो जलाता है और ठंडा होने पर हाथ को काला कर देता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## संसदः प्रावृट्-सत्रात् पूर्वं नवदिल्ल्यां मन्त्रीमण्डलस्य महत्त्वपूर्णा रणनीतिकसभा समपन्ना



संसदः प्रावृट्-सत्रात् प्राक् गतदिने नवदिल्ल्यां मन्त्रीमण्डलस्य सभा अभवत्। अस्यां सभायां केन्द्रीयमन्त्री अमितशाहः, राजनाथसिंहः, राजीवरञ्जनसिंहः, किंजारापु राममोहननायडु, किरेन रिजिजुः च उपस्थिताः आसन्। सभायाः समये नेतारः आगामि-संसदीय-सत्रस्य रणनीतिं परिकल्पितवन्तः । अस्य मासस्य विंशति दिनाङ्कादारभ्य आगामिमासस्य त्रयोदश दिनाङ्कपर्यन्तं संसत्-प्रावृट्-सत्रं प्रचलति ।

# क्रीडासु डोपिङ्ग-निरोधाय देशे वैधानिक-संरचनायाः सुदृढीकरणस्य सूचना प्राप्ता




सर्वकारेण क्रीडायां स्वच्छतामानेतुं देशस्य वैधानिक संस्थागतं च संरचनां सुदृढं कर्तुं राष्ट्रिय-डोपिङ्ग-निरोध-अधिनियमः, 2022 अथ राष्ट्रिय-डोपिङ्ग-निरोध-(संशोधनम्) अधिनियमः, 2025 इत्येतयोः आरम्भस्य सूचना दत्ता अस्ति। क्रीडासु डोपिङ्ग-निरोधाय, क्रीडालूनाम् अधिकाराणां रक्षणाय, अन्ताराष्ट्रिय-स्वीकृत-डोपिङ्ग-विरोधी-मानकानाम् अनुगुणं क्रीडा स्पर्धायाः अखण्डतायै च विधिरेषा समग्रं वैधानिकम् आधारं प्रददाति

# दिल्ली-नगरे मुख्यमन्त्रिण्या रेखागुप्तया पञ्चचत्वारिंशत् नूतनानां आयुष्मान-आरोग्य-मन्दिराणाम् उद्घाटनं कृतम्



दिल्ली-राज्यस्य मुख्यमन्त्री रेखा गुप्ता गतदिने नवदेहली-नगरे पञ्चचत्वारिंशत् नूतनानां आयुष्मान-आरोग्य-मन्दिराणाम् उद्घाटनम् अकरोत्। सामाजिक-माध्यम-प्रसारे मुख्यमन्त्री उक्तवती यत् नगरस्य निवासिनः स्वगृहं निकषा एव उत्तम-स्वास्थ्य-सेवाः प्राप्नुयुरिति सङ्कल्पसिद्धये सर्वकारः प्रतिबद्धः अस्तीति। अद्य दिल्ली-नगरे पञ्चदशोत्तरचतुश्शताधिकानि प्रायः आयुष्मान-आरोग्य-मन्दिराणि प्रचलन्ति, एकादशशतोऽधिकानि आयुष्मान-आरोग्य-मन्दिराणि शीघ्रमेव प्राप्तानि भविष्यन्तीत्यपि सा अवोचत्।

# ऋतुविज्ञान-विभागेन अरुणाचल-असम-मेघालयादिषु राज्येषु प्रचण्डवृष्टेः पूर्वानुमानं कृतम्

भारतस्य ऋतुविज्ञान-विभागेन अद्य अरुणाचलप्रदेशस्य, असम-राज्यस्य, मेघालयस्य, ओडिशा-राज्यस्य च केषुचित् भागेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति। बिहारस्य, छत्तीसगढस्य, पूर्व-मध्यप्रदेशस्य, पूर्व-उत्तरप्रदेशस्य, झारखण्ड- नागालैण्ड्- मणिपुरस्य, मिजोराम्- त्रिपुरा-उत्तराखण्ड्-राज्यादिभिस्समं विदर्भस्य, पश्चिमबङ्गस्य, सिक्किम्-राज्यस्य च केषुचित् भागेषु अपि दिने मध्यमात् प्रबलपर्यन्तं वर्षा भवितुम् अर्हति।

# जापान-ओपन्-क्रीडायाः उपान्त्यचक्रे प्रविष्टा पी. वि. सिन्धु, अद्य चेन् युफेय् इत्यनया सह स्पर्धा



बैड्मिण्टन्-क्रीडायां द्विवारं ओलिम्पिक्-पदकविजेत्री पी. वि. सिन्धु इत्येषा जापान-ओपनाख्यायाः क्रीडायाः उपान्त्यचक्रे प्रवेशं प्राप्तवती। जपान्-देशस्य पूर्वविश्वविजेत्री नोजोमी ओकुहारा इत्यस्याः महिला एकलस्य प्रागुपान्त्यचक्रीय-स्पर्धायाः निराकरणात् परं सिन्धु प्रगतिम् अकरोत्, येन भारतीय-क्रीडिकायै वाक्-ओवर् इति प्राप्तः। जगतः दशमी क्रीडिका सिन्धु इदानीं चीनदेशस्य चतुर्थ्या क्रीडिकया चेन् युफेय् इत्यनया सह अद्य उपान्त्यचक्रे क्रीडिष्यति।

# द्वितीयायां एकदिवसीयक्रिकेटस्पर्धायां इंग्लैण्डदेशेन भारतं पराजितम्, श्रृंखला १-१ इति समतायाम्



द्वितीयायां एकदिवसीयप्रतिस्पर्धायां इंग्लैण्डदेशेन भारतं चतुर्भिः स्तौभैः (विकेट्-माध्यमेन) पराजितम्। टॉस-क्रीडायां पराजित्य प्रथमं कन्दुकताडनं कुर्वन् भारतस्य सम्पूर्णः दलः ४४ चक्रेषु २३३ धावनाङ्कान् (रन्) कृत्वा सीमितः अभवत्। भारतपक्षात् श्रेयस अय्यरेण ६६ धावनाङ्काः, विराट कोहलिना च ६५ धावनाङ्काः रचिताः। इंग्लैण्डदेशस्य कृते जोफ्रा आर्चरेण गस एटकिंसनेन च त्रयः-त्रयः क्रीडकाः (विकेटाः) निष्कासिताः। साकिब महमूदाय द्वौ क्रीडकौ प्राप्तौ।उत्तरपक्षे इंग्लैण्डदलेन ४५ तमे चक्रे षट् क्रीडकान् (विकेटान्) त्यक्त्वा स्वलक्ष्यं सम्प्राप्तम्। अनुभवशालिना बलेन जो रूटेन अविजित्य ९१ धावनाङ्कानां क्रीडां कृत्वा दलं विजयं प्रति नीतम्। भारतपक्षात् गुरनूर बरारेण द्वौ क्रीडकौ निष्कासितौ। जो रूटः सर्वश्रेष्ठः क्रीडकः' चितः।

# राष्ट्रीयस्वयंसेवकसङ्घस्य (आर.एस.एस.) यात्रा सङ्घटित-स्वैच्छिककार्याणां शक्तेः तथा च निःस्वार्थसेवामूल्यानां चिरस्थायिप्रमाणं वर्तते




उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः अवदत् यत् राष्ट्रीयस्वयंसेवकसङ्घस्य (आर.एस.एस.) यात्रा सङ्घटित-स्वैच्छिककार्याणां शक्तेः तथा च निःस्वार्थसेवामूल्यानां चिरस्थायिप्रमाणं वर्तते। नवदिल्ल्यां श्यामजाजू-अनुपमत्रिवेद्योः 'आरएसएस@100: सेवा, एकता और बलिदान की एक शताब्दी' इति पुस्तकस्य विमोचनं कुर्वन् सः इदं कथितवान्।
उपराष्ट्रपतिना उक्तं यत् राष्ट्रीयस्वयंसेवकसङ्घः निःस्वार्थसेवया राष्ट्रनिर्माणे च एकतायाः राष्ट्रियचेतनायाः च आदर्शान् सुदृढान् अकरोत्। सः अवदत् यत् सङ्घस्य शताब्द्याः यात्रा इदं दर्शयति यत् स्थायी राष्ट्रीयप्रगतिः केवलं शासकीयसंस्थानां माध्यमेन एव न, अपितु नागरिककर्तव्यानां पालनेन स्वैच्छिकसेवया च सम्भवति। श्री राधाकृष्णन् महोदयः अकथयत् यत् सङ्घस्य यात्रा भारतस्य सांस्कृतिकमूलानां, आनुवंशिकतायाः (विरासतः) परम्पराणां च पुनर्जीवनस्य, सुदृढीकरणस्य तथा च पुनर्निर्माणस्य यात्रा अस्ति।

**रक्षामन्त्रिणः वक्तव्यम्**

अस्मिन् अवसरे रक्षामन्त्री राजनाथ सिंहः अवदत् यत् आर.एस.एस. वर्गेण प्रत्येकस्यां प्रतिकूलायाम् परिस्थितौ राष्ट्रियहितानि, सेवां लोकतन्त्रं च रक्षितुं महत्त्वपूर्णा भूमिका निर्वूढा। श्री सिंहः अकथयत् यत् सङ्घः कस्यापि व्यक्तेः मूल्याङ्कनं तस्य धर्मेण न, अपितु राष्ट्रं प्रति तस्य समर्पणेन करोति। रक्षामन्त्रिणा प्रतिपादितं यत् सङ्घः सर्वदा 'राष्ट्रं सर्वोपरि' इति भावनया एव कार्यं कृतवान्।

# Manimahesh Yatra 2026 - २५ अगस्त दिनाङ्कात् आरप्स्यते मणिमहेशयात्रा, पञ्जीकरणशुल्के ३० रूप्यकाणां वृद्धिः, हेलिकॉप्टर-सेवा अपि आरप्स्यते

हिमसंस्कृतवार्ताः — चम्बा ।पवित्रा मणिमहेशयात्रा २५ अगस्त दिनाङ्कात् १९ सितम्बर पर्यन्तं प्रचलिष्यति। १ अगस्त दिनाङ्कात् आधिकारिक-जालपुटे (वेबसाइट) अन्तर्जाल-माध्यमेन पञ्जीकरणं (ऑनलाइन पंजीकरण) तथा च स्लॉट-आरक्षणं (Slot booking) आरप्स्यते। श्रद्धालूनां कृते हेलिकॉप्टर-सेवा अपि आरप्स्यते। यात्रावधौ कुगती-परिक्रमणमार्गः पूर्णतया स्थगितं स्थास्यति। प्रारम्भिकरूपेण प्रतिदिनं प्रायः ५,००० श्रद्धालूनां कृते स्लॉट उपलप्स्यते। विशेषेषु अवसरेषु आवश्यकतानुसारं स्लॉट-सङ्ख्या वर्धयितुं शक्ष्यते। यात्रा-पञ्जीकरणशुल्कं २० रूप्यकेभ्यः वर्धयित्वा ५० रूप्यकाणि कर्तुं प्रस्तावः अपि सर्वसम्मत्या स्वीकृतः जातः।शुक्रवासरे पवित्रायाः मणिमहेशयात्रा-२०२६ इत्यस्याः सज्जाः ध्यात्वा मणिमहेश-ट्रस्ट-संस्थायाः उपवेशनं ट्रस्ट-अध्यक्षस्य मण्डलायुक्तस्य (उपायुक्त) च मुकेशरेपसवालस्य अध्यक्षतायाम् अभवत्। उपवेशने राष्ट्रियमार्ग-१५४ए भरमौर-हड़सर सहितं क्षतिग्रस्तानां मार्गाणां, सेतूनां, सुरक्षाभित्तीनां, क्रैश-बैरियर तथा च सूचना-सङ्केतकानां कार्यं १५ अगस्त पर्यन्तं पूरयितुं दिशानिर्देशाः दत्ताः। धनछो, गौरीकुण्ड, डल-झील क्षेत्रेषु पेयजलं, चिकित्सा, विद्युत्, सञ्चारः, शौचालयः सदृशीनां मूलभूत-सुविधानां सुदृढीकरणेन सह अतिरिक्त-जलसञ्चय-भण्डाराणां (Water tanks) संस्थापनाय अपि निर्णयः गृहीतः।

**लङ्गर-समितितः १२ सहस्राणि पञ्जीकरणशुल्कं २५ सहस्राणि च सुरक्षाराशिः**

यात्रावधौ अतिरिक्तं आरक्षिबलं (पुलिस बल) नियोजितं स्थास्यति। यात्रामार्गस्य निरीक्षणं 'ड्रोन' (Drone) तन्त्रज्ञानमाध्यमेन विधास्यते। विधायकस्य डॉ. जनकराजस्य प्रस्तावे प्रत्येकस्मात् लङ्गर-समितितः १२ सहस्ररूप्यकाणि पञ्जीकरणशुल्कं तथा च २५ सहस्ररूप्यकाणि सुरक्षाराशिं (Security money) प्राप्तुं निर्णयः विहितः। हड़सर क्षेत्रतः मणिमहेश पर्यन्तं स्थाप्यमानानां सर्वेषां लङ्गराणां आपणानां च अनुमति-शुल्क-निर्धारणप्रक्रिया भरमौरमण्डलस्य बीडीओ (BDO) डीएफओ (DFO) च माध्यमेन पूरयिष्यते। लूणा क्षेत्रतः हड़सर पर्यन्तं लङ्गर-स्थापनाय अनुमतिं एसडीएम (SDM नागरिक भरमौर) कार्यालयः प्रदास्यति।

# नीट-यूजी (NEET-UG) २०२६ परीक्षायाः परिणामः घोषितः, ११.२१ लक्षं (11.21 लाख) अभ्यर्थिनः उत्तीर्णाः




## देशे प्रथमं स्थानं प्राप्तवत् आर्यन गुप्ता

**हिमसंस्कृतवार्ताः — शिमला ।** देशस्य आयुर्विज्ञानमहाविद्यालयेषु स्नातकप्रवेशाय राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा-स्नातक (नीट-यूजी) २०२६ मध्ये ११.२१ लक्षं अभ्यर्थिनः उत्तीर्णाः अभवन्। पञ्जाबस्य आर्यनगुप्ता हरियाणायाश्च पंशुलबंसलः संयुक्तरूपेण ७२० अङ्केभ्यः सर्वाधिकं ७१५ अङ्कान् सम्प्राप्य शीर्षस्थानं प्रापतुः। नेशनल टेस्टिंग एजेंसी (NTA) पक्षतः गुरुवासरे घोषितेषु परिणामेषु कुल १९ अभ्यर्थिभ्यः ७०० तः अधिकाः अङ्काः प्राप्ताः। १३८ अभ्यर्थिनः ७२० अङ्केभ्यः ६९० तः अधिकाः अङ्कान् अलभन्त, एषु ९३ प्रतिशततः अधिकाः अभ्यर्थिनः प्रथमावारं नीट-यूजी परीक्षायां सम्मीलिताः आसन्। एते अभ्यर्थिनः चिकित्सा (मेडिकल), दन्तचिकित्सा (डेंटल), आयुष-पाठ्यक्रमाणां स्नातकप्रवेशार्थं पात्राः संजाताः। एनटीए-संस्थया स्वकथने प्रोक्तं यत्, परिणामाः समये घोषिताः सन्ति, येन परामर्शस्य (काउंसलिंग) चिकित्सा महाविद्यालयप्रवेशस्य च कार्यसारणी (शेड्यूल) सम्यक् समये प्रचलति। ६९० वा तदधिकान् अङ्कान् प्राप्तवतां शीर्ष-१३८ उमेदवाराणां सूची प्रसारिता अस्ति।

## आकर्षगुप्ता हिमाचल-प्रदेशस्य शीर्षस्थानप्राप्तकर्ता



आकर्षगुप्ता हिमाचलप्रदेशस्य शीर्षस्थानप्राप्तकर्ता जातः। तेन ९९.९९ पर्सेंटाइल (Percentile) अङ्कैः साकं अखिलभारतीयस्तरे (All India Rank) १२८ तमा श्रेणी प्राप्ता। आकर्षः प्रदेशस्य काङ्गड़ामण्डलस्य निवासी वर्तते।

## नीट-२०२६ परीक्षायां कौटिल्य-संस्थानस्य दीपिकया प्रदीपितं नाम

कौटिल्य-कोचिंग-क्लासेज-हमीरपुर इत्यस्याः छात्रा दीपिकाठाकुरा नीट (यूजी)-२०२६ परीक्षायां उत्कृष्टं प्रदर्शनं कृत्वा संस्थानस्य मण्डलस्य च नाम आलोकितं कृतवती। दीपिकया परीक्षायां ६२१ अङ्काः, ९९.७५ परसेंटाइल तथा च सामान्यश्रेण्यां अखिलभारतीयश्रेण्यां (AIR) २२७२ तमा स्थितिः प्राप्ता।




दीपिकाठाकुरा (पुत्री नरेन्द्रकुमारः वीणा देवी च) विगतद्विवर्षेभ्यः कौटिल्य-कोचिंग-क्लासेज इत्यस्याः नियमितछात्रा आसीत्। तस्याः साफल्यस्य पृष्ठतः कठोरपरिश्रमः, नियमितस्वाध्यायः, मातापित्रोः सहयोगः संस्थानस्य शिक्षकाणां मार्गदर्शनं च आसीत्। संस्थानस्य निदेशकैः शिक्षकवृन्दैश्च दीपिकायाः उपलब्धौ हर्षं प्रकटयद्भिः तस्यै वर्धापनाः (बधाई) वितीर्णाः। तैः प्रोक्तं यत् दीपिकायाः सफलता दृढसङ्कल्पस्य, निरन्तराभ्यासस्य, उचितमार्गदर्शनस्य च प्रतिफलम् अस्ति। कौटिल्य-कोचिंग-क्लासेज इत्यस्याः प्रबन्धनिदेशिका (MD) शिवानीत्रेहानशर्मा अपि दीपिकां प्रति वर्धापनं प्रकटयन्ती तस्याः उज्ज्वलभवितव्याय शुभकामनाः प्राकटयत्। सा ज्ञापितवती यत् दीपिकया जेईई-मेन् (JEE Main) परीक्षायाम् अपि श्रेष्ठं प्रदर्शनं विधातुं ९८.६ परसेंटाइल प्राप्ताः। शिवानीशर्मा अवदत् यत् संस्थानस्य उद्देश्यं सर्वदा छात्रेभ्यः गुणवत्तापूर्णशिक्षायाः प्रदाने वर्तते। कौटिल्य-कोचिंग-क्लासेज मध्ये नीट, जेईई, एनडीए (NDA) सहितम् अन्यासां प्रतियोगात्मकपरीक्षाणां सज्जा कारयिष्यते।

## दर्शिलः ६४४ अङ्कान् सम्प्राप्तवान्

नीट-यूजी २०२६ तमस्य वर्षस्य परीक्षापरिणामेषु 'मिनर्वा स्टडी सर्कल' इत्यनेन एकवारं पुनः प्रदेशे श्रेष्ठं प्रदर्शनं कुर्वन् स्वकीयायाः शैक्षणिकश्रेष्ठतायाः परिचयः प्रदत्तः। दर्शिलठाकुरः ६४४ अङ्कान् सम्प्राप्य संस्थाने सर्वोच्चस्थानं अलभत्। अस्मिन् वर्षे परिणामेषु ६ छात्रैः ६०० तः अधिकाः अङ्काः, २५ तः अधिकैः छात्रैः ५५० तः अधिकाः अङ्काः तथा च ६० तः अधिकैः ५०० तः अधिकाः अङ्काः प्राप्ताः। मिनर्वा स्टडी सर्कल इत्यस्य संस्थापकेन प्रवेशचन्देलेन, मुख्यप्रबन्धनिदेशकेन राकेशचन्देलेन, प्रबन्धनिदेशकेन स्वदेशचन्देलेन तथा च धर्मशालाकेन्द्रप्रमुखेन कैप्टन-अजयवर्मणा सफलाः छात्राः, तेषाम् अभिभावकाः शिक्षकाश्च वर्धापिताः। नीट यूजी-२०२६ परिणामे शिमलायाः प्रद्युम्नधर्मा ६४६, पार्थपण्डितः ६३१ तथा च आदित्यठाकुरः ६२३ अङ्कान् हस्तगतान् कृतवन्तः। तत्रैव 'एस्पायर आईआईटी एंड मेडिकल' संस्थानस्य छात्रैः अपि उत्कृष्टं प्रदर्शनं विहितम्। संस्थानस्य १२० तः अधिकैः छात्रैः ५०५ वा तदधिक अङ्काः प्राप्ताः। चतुर्भिः छात्रैः ६०० तः अधिकाः अङ्काः प्राप्ताः, येषु यतिनराजेन ६१० अङ्काः लब्धाः। संस्थानस्य प्रबन्धनानुसारं एतेषाम् परिणामानाम् आधारेण अस्मिन् वर्षे १६० तः अधिकानां छात्राणाम् एमबीबीएस (MBBS) सहितं विभिन्न-सर्वकारीय-चिकित्सामहाविद्यालयेषु चयनस्य आशा वर्तते। संस्थानस्य प्रबन्धनिदेशकेन योगेन्द्रकुमारमीना महोदयेन सर्वे सफलाः छात्राः तेषाम् अभिभावकाश्च वर्धापिताः। तेन कथितं यत् एस्पायर-संस्थाने केवलं पाठ्यक्रमस्य पूरणाय एव ध्यानं न दीयते, अपितु छात्राणाम् अवधारणाधारित-सज्जा (concept-based preparation), नियमिताः परीक्षाः विस्तृतरूपेण प्रदर्शनविश्लेषणं (performance analysis) च ध्यात्वा विशेषो बलो दीयते।

# मुख्यमंत्रिणः सुक्खोः सेब-उत्पादकेभ्यः उपहारः, सेब-क्रयणस्य अवशिष्ट-भुक्तये ४५ कोटिरूप्यकाणि विमोचितानि

हिमसंस्कृतवार्ताः — शिमला। हिमाचलप्रदेशस्य सेब-उत्पादकेभ्यः एका महती वार्ता अस्ति। मुख्यमन्त्रिणा ठाकुर-सुखविन्दरसिंहसुक्खू महोदयेन शुक्रवासरे शिमलायां उद्यानविभागस्य एकस्य प्रमुखायाः सभायाः अध्यक्षता कृता। अस्मिन् अन्तरे तेन स्पष्टीकृतं यत् उत्पादकानां लम्बितानां देयतानां निस्तारणाय राज्यसर्वकारेण ४५ कोटिरूप्यकाणां राशिः प्रसारिता अस्ति। मुख्यमन्त्रिणा ज्ञापितं यत् मण्डी-मध्यस्थता-योजनायाः अन्तर्गतं ३० स्यूतान् (बैग) यावत् सेब-विक्रयणं कृतवद्भ्यः उत्पादकेभ्यः तेषां पूर्णा भुक्तिः पूर्वमेव विहिता। तत्रैव, यैः उत्पादकैः १०० स्यूताः ततोऽप्यधिकं वा सेबफलानि विक्रीतानि, तेषां भुक्तिप्रक्रिया अपि अधुना वेगेन आरब्धा अस्ति।

## डी.बी.टी. (DBT) माध्यमेन साक्षात् उत्पादकानां वित्तकोष-संख्यासु गच्छति धनम्

मुख्यमन्त्रिणा उपवेशने प्रतिपादितं यत् राज्यसर्वकारेण एम.आई.एस. (MIS) योजनायाः अन्तर्गतं विगतेषु वर्षेषु अर्थात् २०२२, २०२३, २०२४ तथा च आगामि-२०२५ तमस्य वर्षस्य कृते क्रीतानां सेबफलानां लम्बिता भुक्तिः प्रत्यक्ष-लाभ-हस्तान्तरण (DBT) माध्यमेन प्रेषिता। एतद् धनं साक्षात् सेब-उत्पादकानां वित्तकोष-संख्यासु प्रेष्यते, येन उत्पादकाः कमपि मध्यस्थं विना साक्षात् स्वकीयानां स्थगितानां धनानां लाभं प्राप्नुवन्ति।

## सेब-क्रयणे पारदर्शितायै एच.एम.आई.एस. जालपुटं चलभाष-अनुप्रयोगः चारब्धः

वर्तमाने सेब-ऋतौ एम.आई.एस. अन्तर्गतं सेब-क्रयणस्य सज्जतानां समीक्षां कुर्वन्, मुख्यमन्त्रिणा उद्यान-मण्डी-मध्यस्थता-योजनायाः (HMIS) नूतनस्य जालपुटस्य (वेबसाइट) चलभाष-अनुप्रयोगस्य (मोबाइल एप) च विधिवत् शुभारम्भः विहितः। एषः नूतनः अङ्कीय-मञ्चः (डिजिटल प्लेटफॉर्म) सेबस्य क्रयणात् आरभ्य तस्य प्रसंस्करण (प्रोसेसिंग) पर्यन्तं पूर्णप्रक्रियायाः अन्तर्जाल-अभिलेखं (ऑनलाइन रिकॉर्ड) रक्षिष्यति। सर्वकारस्य मुख्यमुद्देश्यम् अस्याः नूतनायाः अङ्कीयप्रणाल्याः माध्यमेन सेव-क्रयणे पूर्णतया पारदर्शितां कार्यकुशलतां च सुनिश्चितां कर्तुं वर्तते।अस्यां नूतनायां पारदर्शिन्यां व्यवस्थायां सेब-उत्पादकैः जनपदे स्वकीयः [Aadhaar Omitted], भूमिसम्बद्धं विवरणं वित्तकोष-संख्यायाः सूचनां च प्रदाय स्वकीयं पञ्जीकरणं (रजिस्ट्रेशन) कारयितव्यं भविष्यति। एतेन साकं उद्यानपालकेभ्यः स्वकीयाम् उपजं विक्रेतुम् अन्तर्जाल-माध्यमेन समय-स्लॉट (Time slot) आरक्षितुं विशेषसौकर्यम् अपि उपलप्स्यते। अनेन विपणीषु तेषां प्रतीक्षासमयः (वेटिंग टाइम) अत्यधिकः न्यूनः भविष्यति तेभ्यश्च महत् सौकर्यं प्राप्स्यते।

## सङ्ग्रहकेन्द्रेषु पर्याप्त-कर्मचारिणां नियोजनस्य निर्देशः

आगामि-सेब-ऋतुं सुचारुरूपेण सञ्चालयितुं मुख्यमन्त्रिणा सुक्खू महोदयेन अधिकारिणः दृढाः निर्दिष्टाः। तेन प्रोक्तं यत् सेब-क्रयण-ऋतौ सर्वेषु सङ्ग्रहकेन्द्रेषु उत्पादकानां साहाय्यार्थं पर्याप्तानां कर्मचारिणां नियोजनं विधातव्यं, येन उत्पादकेभ्यः स्वफल-विक्रयणे कस्यापि प्रकारस्य समस्यायाः सम्मुखीकरणं न भवेत्।

# हिमाचलप्रदेशे रेल-विस्ताराय केन्द्रसर्वकारः विशेषसहयोगं दद्यात्: मुकेश अग्निहोत्री



**हिमसंस्कृतवार्ताः- शिमला।** उपमुख्यमन्त्री मुकेश अग्निहोत्री केन्द्रसर्वकारं प्रति हिमाचलप्रदेशस्य प्रमुखाणां रेलपरियोजनानां कृते विशेषवित्तीयसहयोगं प्रदातुं, भानुपल्ली-बिलासपुर, चण्डीगढ-बद्दी, ऊना-हमीरपुरं चेति रेलपरियोजनाः प्राथमिकताधारेण अग्रे नेतुं साग्रहं निवेदितवान्। सः अवदत् यत् पर्वतीयराज्यस्य समग्रविकासाय रेल-वायु-सम्पर्कस्य सुदृढीकरणं समयस्यावश्यकता वर्तते, भौगोलिकपरिस्थितीः च वीक्ष्य केन्द्रसर्वकारेण हिमाचलप्रदेशं प्रति विशेषसहयोगस्य दृष्टिकोणः स्वीकरणीयः। उपमुख्यमन्त्री शुक्रवासरे 'अमृत भारत स्टेशन' योजनान्तर्गतं पुनर्विकसिते अम्ब्-अन्दौरा रेलवे स्थानके आयोजिते समारोहे सम्बोधनं कुर्वन् आसीत्। प्रधानमंत्री नरेन्द्रमोदी आभासीयमाध्यमेन (वर्चुअल) अम्ब-अन्दौरा रेलस्थानकस्य शुभारम्भं कृतवान्। अस्मिन् अवसरे प्रधानमंत्री नरेन्द्र मोदी जालन्धरतः आभासीयमाध्यमेन देशस्य ७५ पुनर्विकसितानां अमृत-रेलस्थानकानां लोकार्पणं कृतवान्, येषु अम्ब-अन्दौरा रेलवे स्थानकमपि सम्मिलितम् अस्ति।

उपमुख्यमन्त्री अवदत् यत् आधुनिकस्वरूपे विकसितम् अम्ब-अन्दौरा रेलवे स्थानकम् ऊना-मण्डलस्य कृते गौरवस्य विषयः अस्ति। सः अस्यै उपक्रमाय प्रधानमन्त्रिणः नरेन्द्र मोदिनः कार्तज्ञ्यं प्रकटयन् अवदत् यत् आधुनिकसुविधाभिः सुसज्जितम् इदं स्थानकं यात्रिभ्यः उत्तमं सुविधाजनकं च सेवां प्रदास्यति। २०११ तमे वर्षे रेलस्थानकस्य पदं प्राप्य इदं क्षेत्रस्य परिवहनव्यवस्थायाः महत्त्वपूर्णं केन्द्रं सञ्जातम्। वर्तमानकाले इतः प्रतिदिनं पञ्च रेलयानानि सञ्चाल्यन्ते, येन ऊना-सहितं समीपस्थानां मण्डलानां सहस्रशः यात्रिणः लाभान्विताः भवन्ति।उपमुख्यमन्त्री उक्तवान् यत् भानुपल्ली-बिलासपुर रेलमार्गस्य स्वीकृतिः २००७ तमे वर्षे प्राप्ता आसीत्। तस्मिन् समये परियोजनायाः अनुमानितव्ययः प्रायः एकसहस्रकोटिरूप्यकाणि आसीत्, यः वर्तमानकाले वर्धित्वा १३,४४६ कोटिरूप्यकाणि जातः। राज्यसर्वकारः अस्यां परियोजनायां प्रायः ८४७ कोटिरूप्यकाणां योगदानं दत्तवान् अस्ति। सः साग्रहं निवेदितवान् यत् राज्यसर्वकारस्य इमं भागं 'वन टाइम ग्रांट' (एकवारं प्राप्यम् अनुदानम्) रूपेण स्वीकृत्य बिलासिपुरात् अग्रे रेलमार्गनिर्माणस्य सम्पूर्णं व्ययं केन्द्रसर्वकारः एव वहेत्। सः सूचितवान् यत् ३८ किलोमीटरदीर्घायां चण्डीगढ- बद्दी रेलपरियोजनायां राज्यसर्वकारः प्रायः ३४८ कोटिरूप्यकाणां योगदानं दत्तवान् अस्ति। सोऽपि इमामपि राशिं 'वन टाइम ग्रांट' रूपेण स्वीकर्तुं तथा परियोजनायाः अवशिष्टकार्याणां कृते आवश्यकं वित्तीयसहयोगं प्रदातुं साग्रहं निवेदितवान्। उपमुख्यमन्त्री ऊना-हमीरपुर रेलपरियोजनामपि प्राथमिकताधारेण अग्रे नेतुं याचनां कुर्वन् अवदत् यत् प्रायः ४० किलोमीटरदीर्घः अयं रेलमार्गः क्षेत्रस्य सम्पर्कं सुदृढं कर्तुं साकं आर्थिक- सामाजिक-पर्यटनगतिविधिभ्यः अपि नूतनां गतिं दास्यति। सः अवदत् यत् अम्ब-अन्दौरा रेलस्थानकस्य नाम 'माता श्री चिन्तपूर्णी' देव्याः नाम्ना सह योजयितुं प्रयासाः क्रियन्ते। अनेन सह एव सः उत्तररेल- अधिकारिभ्यः रेलवे स्थानकपरिसरे माता श्री चिन्तपूर्ण्याः प्रतीकचिह्नं स्थापयितुं उपयुक्तस्थानं प्रदातुं साग्रहं सूचितवान्। उपमुख्यमन्त्री उक्तवान् यत् जैजों-पोलियां-मेहतपुर रेलमार्गः राज्यस्य औद्योगिकविकासाय, विशेषतः प्रस्तावित 'बल्क ड्रग पार्क' कृते अत्यन्तं महत्त्वपूर्णः अस्ति। सः अवदत् यत् अस्यै परियोजनायै शीघ्रं स्वीकृतिं प्रापयितुं सः अचिरदेव प्रधानमन्त्रिणा सह मेलिष्यति।

## उपस्थिताः गण्याः मान्याः च-

अस्मिन् अवसरे चिन्तपूर्णी विधानसभाक्षेत्रस्य विधायकः सुदर्शन सिंह बबलू, पूर्वमन्त्री वीरेन्द्र कंवर, पूर्वविधायकाः बलबीर चौधरी तथा चैतन्य शर्मा, प्रदेशकाङ्ग्रेससमित्याः महासचिवः रणजीत सिंह राणा, ब्लॉक काङ्ग्रेससमित्याः अध्यक्षः डॉ. रविन्द्रः, नगरपञ्चायत-अम्ब इत्यस्याः अध्यक्षा अनुसूइया देवी, उपायुक्तः जतिन लालः, आरक्षणाधीक्षकः (एसपी) सचिन हिरेमठः, उत्तररेलविभागस्य मुख्यवाणिज्यप्रबन्धकः (सीसीएम) अंशुमनकुमारः इति एतैः सह रेलविभागस्य वरिष्ठाधिकारिणः बहवः गणमान्याः जनाः च उपस्थिताः आसन्।

# हिमाचले आयुर्विज्ञान-पी.जी. आसनानां सर्वतः बृहत्तमः विस्तारः, २७७ तः वर्धित्वा ५९७ भविष्यति सङ्ख्या




**हिमसंस्कृतवार्ताः — शिमला** ।हिमाचलप्रदेशे स्वास्थ्यसेवानां चिकित्साशिक्षायाश्च सुदृढीकरणाय राज्यसर्वकारेण सर्वकारीय-आयुर्विज्ञान-महाविद्यालयेषु पोस्ट-ग्रेजुएट (पीजी) चिकित्सा-आसनानां सङ्ख्या २७७ तः वर्धित्वा ५९७ कर्तुं प्रस्तावः उपस्थापितः। एकस्मिन्नेव चरणे पी.जी. आसनेषु एतादृशी महती वृद्धिः प्रथमावारं प्रस्ताविता अस्ति। अनेन प्रदेशस्य छात्रेभ्यः राज्ये एव स्नातकोत्तर-अध्ययनस्य अधिकाः अवसराः उपलप्स्यन्ते। साकमेव विविध-विषयेषु विशेषज्ञ-चिकित्सकानां न्यूनातां दूरीकर्तुं साहाय्यं प्राप्स्यते प्रदेशस्य जनेभ्यश्च श्रेष्ठाः स्वास्थ्यसेवाः उपलप्स्यन्ते। पी.जी. वैद्याः आतूराणां (मरीजों) चिकित्सायाम्, आयुर्विज्ञान-शिक्षायां, विशेषज्ञ-स्वास्थ्यसेवासु च प्रमुखां भूमिकां निर्वहन्ति, अतः पी.जी. छात्राणां सङ्ख्यायाः वृद्ध्या सर्वकारीय-चिकित्सा-महाविद्यालयेषु रोगिणाम् परिचर्या अपि इतोऽपि श्रेष्ठा भविष्यति।

अस्य विस्तारस्य ध्यानेन राज्यसर्वकारेण विगतेषु त्रिषु वर्षेषु सर्वकारीय-चिकित्सा-महाविद्यालयेषु 'सीनियर रेजिडेंट' तथा च 'ट्यूटर विशेषज्ञ' इत्येतेषां २१८ नूतनानि पदानि अपि सृजितानि। एतेषु डॉ. राजेन्द्रप्रसाद चिकित्सा महाविद्यालय टाण्डा इत्यस्मिन् ५४, डॉ. वाई.एस. परमार चिकित्सा महाविद्यालय नाहनम् इत्यस्मिन् ३१, पण्डित जवाहरलाल नेहरू चिकित्सा महाविद्यालय चम्बा इत्यस्मिन् ३२, श्री लालबहादुर शास्त्री चिकित्सा महाविद्यालय मण्डी (नेरचौक) इत्यस्मिन् ३६, डॉ. राधाकृष्णन चिकित्सा महाविद्यालय हमीरपुरम् इत्यस्मिन् ६३ तथा च अटल इंस्टीट्यूट ऑफ मेडिकल सुपर स्पेशियलिटी चमियाना इत्यस्मिन् २ पदे समाविष्टे स्तः। एतेषां पदानां सृजनेन विशेषज्ञ-स्वास्थ्यसेवाः सुदृढ़ाः भविष्यन्ति, पी.जी. चिकित्साशिक्षायाः प्रोत्साहनं प्राप्स्यति आतूरेभ्यश्च श्रेष्ठतमः उपचारः प्राप्तुं शक्ष्यते।मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य नेतृत्वे वर्तमान-राज्यसर्वकारः सर्वकारीय-चिकित्सा-महाविद्यालयेषु आधुनिकानां सौकर्याणां विकासे विशेषज्ञ-मानवसंसाधनानां वर्धने च विशेषं ध्यानं ददाति। सर्वकारस्य उद्देश्यं चिकित्साशिक्षां सुदृढ़ां कृत्वा प्रदेशे श्रेष्ठाः स्वास्थ्यसेवाः उपलब्धं कारयितुं वर्तते। मुख्यमंत्री सुक्खू महोदयेन प्रतिपादितं यत् सीनियर रेजिडेंट्स बृहच्चिकित्सालयानां आयुर्विज्ञान-महाविद्यालयीनां च मुख्यस्तम्भाः भवन्ति। ते रोगिणाम् उपचारे, चिकित्साशिक्षायाम्, अनुसन्धाने (शोध), नैदानिक-प्रशिक्षणे (क्लीनिकल ट्रेनिंग) च महत्त्वपूर्णां भूमिकां वहन्ति। ते शिक्षकाणां चिकित्सा-छात्राणां च मध्ये महत्त्वपूर्णां सेतुं कार्यं कुर्वन्ति तथा च चिकित्सालयानां सेवानां सुचारुरूपेण सञ्चालने योगदानं ददति। तेन प्रोक्तं यत् पी.जी. आसनानां वृद्ध्या प्रदेशे अधिकाः विशेषज्ञ-चिकित्सकाः सज्जाः भविष्यन्ति, ये जनानां वर्धमानाः स्वास्थ्य-आवश्यकताः पूरयितुं साहाय्यं विधास्यन्ति। राज्यसर्वकारः चिकित्सामहाविद्यालयेषु आधुनिकानां भवनानां, अत्याधुनिक-जाँच-सुविधानां, प्रयोगशालानां श्रेष्ठ-शिक्षण-संसाधनानां च उपलब्धतां कारयति येन गुणवत्तापूर्णा चिकित्साशिक्षा स्वास्थ्यसेवा च सुनिश्चिता भवेत्।

कुत्र कियन्तः वर्धिष्यन्ते पी.जी. आसनानि

| चिकित्सा महाविद्यालयः | वर्तमान आसनानि | नूतन आसनानि |
|---|---|---|
| आईजीएमसी शिमला | १३९ | २३० |
| टाण्डा चिकित्सा महाविद्यालयः | ९९ | १५६ |
| नेरचौक चिकित्सा महाविद्यालयः | २४ | ७९ |
| नाहन चिकित्सा महाविद्यालयः | ३ | ३५ |
| चम्बा चिकित्सा महाविद्यालयः | ४ | ३२ |
| हमीरपुर चिकित्सा महाविद्यालयः | ८ | ६५ |



# रम्यास्ति वै गोष्ठी

रम्यास्ति वै गोष्ठी, संस्कृतसंवर्धने
चल सखे! शीघ्रं संगे, संस्कृतसंरक्षणे

काश्याम् पुरैकः संस्कृतपुत्रः
कर्तुं स्वराष्ट्रं संस्कृतयुक्तम्
शास्त्रोद्देशनैव संस्कृतमययुगं
परितज्य निजस्वार्थं,परिकल्पितमद्भुतम्

व्यवहारकाले वेदस्य भाषां
उच्चारयन्ति देवस्य भाषाम्

देवस्थानबोधं भवतीह निश्चितं
आगच्छन्तु सर्वे वदन्तु संस्कृतम्

केचिद्वदन्ति , मृतमस्ति लोके
व्यर्थं प्रयासं कुर्वन्ति लोभे
अस्ति देवभाषा हृदयेऽस्माकं
हनुमद्रूपे किं वै , दर्शयेयं पावनं

हिमसंस्कृतवार्ताः ,
ईशान तिवारी

# पुनः-नीट-परीक्षायां डीपीएस-बोकारो-विद्यालयस्य उत्कृष्टं प्रदर्शनम्
## अखिलभारतीय-क्रमाङ्के ५४६ प्राप्त्वा आदित्यः विद्यालयस्य श्रेष्ठः अभवत्






**हिमसंस्कृतवार्ता सौरभः दे बोकारो।** राष्ट्रिय-परीक्षा-अभिकरणेन (एन.टी.ए.) आयोजितायां पुनः-नीट (यूजी–२०२६) परीक्षायां दिल्ली पब्लिक स्कूल, बोकारो-विद्यालयस्य छात्राः पुनरपि उत्कृष्टां सफलताम् अवापुः। विद्यालयस्य षड्विंशतिः (२६) छात्राः छात्र्यश्च परीक्षायां सफलतां प्राप्तवन्तः। तेषु दश (१०) विद्यार्थिनः ९९ प्रतिशताधिकं परसेंटाइलम् अर्जितवन्तः।विद्यालयस्य विज्ञान-सङ्कायस्य सीबीएसई-द्वादशकक्षायाः राष्ट्रिय-प्रथमस्थानप्राप्तः आदित्य मिश्रः पुनः-नीट-परीक्षायामपि स्वकीयं उत्कृष्टत्वं प्रमाणितवान्। सः ७२० अङ्केषु ६७० अङ्कान् प्राप्तवान्। तस्य अखिलभारतीय-क्रमाङ्कः (ए.आई.आर.) ५४६, सामान्य-श्रेण्यां ३४४ क्रमाङ्कः तथा ९९.९७२ परसेंटाइलः अभवत्।तेजस्विनी सामान्य-आर्थिकदुर्बलवर्गे (ई.डब्ल्यू.एस.) ८५९ क्रमाङ्कं तथा समग्रक्रमाङ्के ७९२७ स्थानं प्राप्तवती। तया ६०७ अङ्काः तथा ९९.५९४ परसेंटाइलः अर्जितः। ईशान-गौरवः अनुसूचितजाति-श्रेण्यां १२९६ क्रमाङ्कं प्राप्त्वा तृतीयस्थानम् अलभत। अन्येषां सफलविद्यार्थिनां मध्ये तनिष्क-यशः, आयशा-फलक-सिद्दीकी, विनीत-कुमार-झा, अनुपम-शर्मा, ईधा-सिंह, अरिञ्जय-सिंह, मयङ्क-राजः, तौज़ीह-दूजा, श्रीसन्त-कुमार-सिंहः, अदितिः चन्द्रा, अक्षिता-पाठकः, तान्या-श्री, आव्या-सिंह तथा रोहन-कुमार-राठौरः प्रमुखाः सन्ति।विद्यालयस्य प्राचार्यः डॉ. ए. एस्. गाङ्गवार-महोदयः सर्वान् सफलविद्यार्थिनः अभिनन्दितवान्। सः उक्तवान् यत् एषा सफलता विद्यार्थिनां कठिनपरिश्रमस्य, दृढनिष्ठायाः तथा आचार्याणां कुशलमार्गदर्शनस्य फलम् अस्ति। प्रथमपरीक्षायाः निरसनानन्तरम् अपि प्रतिकूलपरिस्थितिषु विद्यार्थिभिः प्रदर्शिता एषा सफलता प्रशंसनीया गौरवास्पदा च अस्ति। विद्यालयस्य एषा उपलब्धिः समग्रविद्यालयपरिवारस्य गौरवं वर्धयति।

# डीपीएस-बोकारोविद्यालयस्य १०७ छात्राः
## कराटे-बेल्ट-ग्रेडिङ्ग-परीक्षायां सफलाः



हिमसंस्कृतवार्ता-सौरभः दे बोकारो । दिल्ली पब्लिक स्कूल, बोकारो-इस्पातनगरस्य १०७ छात्राः कराटे-बेल्ट-ग्रेडिङ्ग-परीक्षायां उल्लेखनीयां सफलताम् अवापुः। स्वस्व-कौशलानुसारं तेषां वर्णबेल्टाः तथा ग्रेडिङ्ग-प्रमाणपत्राणि प्रदत्तानि। प्राथमिकविभागस्य ७८ छात्रेषु ३७ छात्राः पीतवर्णबेल्टम्, २ छात्रौ नारङ्गवर्णबेल्टम्, ७ छात्राः हरितवर्णबेल्टम्, २४ छात्राः ब्लू-टू-बेल्टम्, १ छात्रः ब्लू-वन-बेल्टम्, ३ छात्राः पर्पल-टू-बेल्टम्, १ छात्रः पर्पल-वन-बेल्टम्, २ छात्रौ ब्राउन-श्री-बेल्टम् तथा १ छात्रः ब्राउन-टू-बेल्टम् अलभन्त। वरिष्ठविभागस्य २९ छात्रेषु १४ छात्राः पीतवर्णबेल्टम्, १ छात्रः हरितवर्णबेल्टम्, १ छात्रः ब्लू-टू-बेल्टम्, ६ छात्राः ब्लू-वन-बेल्टम्, १ छात्रः पर्पल-टू-बेल्टम्, २ छात्रौ पर्पल-वन-बेल्टम्, ३ छात्राः ब्राउन-थ्री-बेल्टम् तथा १ छात्रः ब्राउन-टू-बेल्टम् प्राप्तवन्तः। विद्यालयस्य प्राचार्यः तथा झारखण्ड-खेल-कराटे-सङ्घस्य अध्यक्षः डॉ. ए. एस्. गाङ्गवार-महोदयः सफलविद्यार्थिनः अभिनन्द्य तेषां करयोः वर्णबेल्टान् तथा टेन्शिन्कान् शोतोकान् यू कराटे फेडरेशन् ऑफ् इण्डिया संस्थया प्रदत्तानि आधिकारिक-ग्रेडिङ्ग-प्रमाणपत्राणि वितरितवान्। अस्मिन् अवसरे सङ्घस्य महासचिवः मुख्यप्रशिक्षकश्च शिहान् खेड़ु गोराई-महोदयः अपि उपस्थितः आसीत्। विद्यार्थिनः सम्बोधयन् डॉ. गाङ्गवारः उक्तवान् यत् कराटे आत्मरक्षायाः प्रभावी साधनम् अस्ति। एतत् अनुशासनम्, आत्मविश्वासम्, शारीरिकबलम् तथा मानसिकदृढतां च संवर्धयति। सफलविद्यार्थिनां एषा उपलब्धिः विद्यालयस्य गौरवं वर्धयति।

# लौकिकन्यायकोशः
## कूपकूर्मन्यायः

कूपे वर्तमानः कूर्मः कूपमेव विश्वं मन्यते। संकुचितमनसाः जनाः स्वक्षेत्रमेव विश्वं मन्यन्ते ततः तेषां प्रवृत्तिरपि संकुचिता भवति इति न्यायेनानेन बोध्यते।
समान- कूपमण्डूकन्यायः। यस्मिन् कूपे जन्म जातं तत्रैव निःशेषं जन्म यापयति कूर्मः। अन्यत्र गन्तव्यमित्यपि सः न भावयति। संकुचितवृत्तेः जनस्य वर्णनाय अस्य न्यायस्य प्रयोगो भवति। कमपि विषयं सत्यत्वेन कस्मिन्नपि विदुषी प्रतिपादयति सति कश्चन अल्पज्ञः तत् सत्यत्वेन न स्वीकरोति। तादृशप्रङ्गम् उद्दिश्य अस्य न्यायस्य प्रयोगो भवति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया एका चित्रविचित्रा वार्ता पठिता। एकस्मिन् रुचिराफले काभ्याञ्चित् दम्पतीभ्याम् भुशुण्डी- गोलकस्य आवरणं प्राप्तम्।
**नन्दिनी-** अहो! फले गोलकावरणं प्राप्तम्? एतत् अतीव भयङ्करम्! मया अपि अन्या काचित् आश्चर्यकरी वार्ता श्रुता। एकेन कुक्कुरेण प्रमादात् भर्जनयन्त्रं चालितम्। तेन गृहे अग्निदाहः जनितः।
**काव्या-** हा कष्टम्! कुक्कुरेण अग्निदाहः कृतः इति अतीव दुःखकरम्। अन्यच्च, अन्तर्जाले "सप्तममासः दिनदर्शिकायाः निष्कासितः" इति काचित् उपहासवार्ता जनैः दृष्टा।
**नन्दिनी-** हा हा! जनाः तादृशीम् उपहास-वार्ताम् अपि सत्याम् इति चिन्तितवन्तः सन्ति इति महदाश्चर्यम्। खगोलशास्त्रे अपि एका नूतना वार्ता वैज्ञानिकैः घोषिता। दूरवीक्षण-यन्त्रेण एकः तप्तशिलाद्रवग्रहः दृष्टः। तत्र पाषाण-बाष्प- वायुमण्डलम् अस्ति इति तैः ज्ञातम्।
**काव्या-** पाषाण-बाष्प-वायुमण्डलम्! एतत् तु अतीव विस्मयकरम्! अद्यतनीयाः सर्वाः अपि वार्ताः अतीव चित्रविचित्राः सन्ति। धन्यवादः नन्दिनि।

# हास्यकणिका

**पतिः**- भोः, वद, मम कः स्वभावः त्वां न रोचते?
**भार्या**- वदामि।
पतिः- मौनं भव, यथास्थितिं स्वीकुरु।
😂😂😂😂😂😂😂😂😂😂
**पतिः पत्नीं पृच्छति-** "भवती सर्वदा मां किमर्थं ताडयति?"
**पत्नी-** महिलाः गतकाले उपस्कराः कुट्ट्यन्ते स्म, अधुना सज्जीकृतानि आयान्ति, अतः कुट्टनं समाप्तम्।
गतसमये वस्त्राणि कुट्ट्यन्ते स्म, अधुना क्षालनयन्त्रम् आगतम्, अतः कुट्टनं समाप्तम्।
भूतकाले महिलाः धान्यं कुट्ट्यते स्म, अधुना सज्जीकृतं लभ्यते। इदानीं ताडनाय पतिः एव अवशिष्टः, सः समाप्तौ यावत् ताडयिष्यते।
😅😂
अतः, अहं सर्वदा त्वं ताडयामि 😂😜😜
पतिः 😔😔😔😔😔😔😔

